प्रच्युत्य, प्रच्याव्य, प्रचुच्यूष्य, प्रचोच्यूय्य, प्रचुच्यावयिष्य-प्रचिच्यावयिष्य ;

च्यावम् २, च्युत्वा २, } च्यावम् २, च्यावयित्वा २, } चुच्यूषम् २, चुच्यूषित्वा २, } चोच्यूयम् २, चोच्यूयित्वा २, }
चुच्यावयिषम् २ -चिच्यावयिषम् २ ; चुच्यावयिषित्वा २-चिच्यावयिषित्वा २. }

(559) "च्युतिर् आसेचने" (I-भ्वादिः-40. सक. सेट्. पर.)

आसेचनम्=ईषत्सेकः, आ=समन्तात् सेको वा ।

च्योतकः-तिका, च्योतकः-तिका, चुच्योतिषकः-चुच्युतिषकः-षिका, चोच्युतकः-तिका ;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककोचतिवत् (200) ज्ञेयानि । शतरि-च्योतन्[A]-न्ती । धातोरस्येरित्त्वेऽपि, इरित्त्वप्रयुक्तकार्यस्य कृदन्तेष्वभावात् रूपसाम्यं भवत्येव ।

(560) "च्युस सहने" (X-चुरादिः-1747. सक. सेट्. उभ.)

'च्यु सहने' इत्यस्य पाठभेदोऽयम् ।

च्योसकः-सिका, चुच्योसयिषकः-षिका ;
च्योसयिता-त्री, चुच्योसयिषिता-त्री ;
च्योसयन्-न्ती, चुच्योसयिषन्-न्ती ;
च्योसयिष्यन्-न्ती-ती, चुच्योसयिषिष्यन्-न्ती-ती ;
च्योसयमानः, चुच्योसयिषमाणः ;
च्योसयिष्यमाणः, चुच्योसयिषिष्यमाणः ;
[1]सुच्यूः-सुच्युसौ-सुच्युसः ; —
च्योसितः-तम्, चुच्योसयिषितः-तवान् ;
च्योसः, चुच्योसयिषुः ;

1. सकारस्य, 'ससजुषो रुः' (8-2-66) इति रुत्वे, 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इत्युपधाया दीर्घः । तदनन्तरं विसर्गः ।

A. 'अतेनुमुरारिर्मम चिन्मयोऽन्तिके च्योतन् दिशः प्रश्च्युतितैः स्मितामृतैः ॥' धा. का. 1-6.